# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१)(New&Old)** | **प्रश्नपत्रम् – 2** | गुणाः –70 |
| विषयः – सर्वदर्शनम् | **कोड –C.C.4.1.1** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –10/10/2019 | सन्दर्भग्रन्थः – योगसूत्रम् | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ किमपि एकं सूत्रं यथाभाष्यं व्याख्यात।** ५

१ तदा द्रष्टुः स्वरूपेऽवस्थानम्।

२ प्रत्यक्षानुमानागमाः प्रमाणानि।

**प्रश्न २ एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ योगस्वरूपं निबध्नीत।

२ क्लिष्टाऽक्लिष्टवृत्तीनां यथाभाष्यं विवरणं लिखत।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ किमपि एकं सूत्रं यथाभाष्यं व्याख्यात।** ५

१ 'स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृष्टभूमिः'।

२ 'स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का'।

**प्रश्न ४ एकस्य निबन्धात्मकमुत्तरं लिखत।** १०

१ योगदर्शनानुसारम् ईश्वरस्वरूपं निबध्नीत।

२ चित्तवृत्तीनां के निरोधोपायाः योगशास्त्रे वर्णिताः ? निबन्धमेकं लिखत।

**तृतीयान्वितिः (Unit 3)**

**प्रश्न ५ किमपि एकं सूत्रं यथाभाष्यं व्याख्यात।** ५

१ ‘तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः’।

२ दृग्दर्शनशक्त्योरेकात्मतेवास्मिता।

**प्रश्न ६ एकस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ पञ्चक्लेशानां सोदाहरणं वर्णनं कुरुत।

२ योगसम्मतं कैवल्यस्वरूपं निबध्नीत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ किमपि एकं सूत्रं यथाभाष्यं व्याख्यात।** ५

१ ‘ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः’।

२ ‘ततः क्षीयते प्रकाशावरणम्’।

**प्रश्न ८ एकस्य निबन्धात्मकमुत्तरं लिखत।** **१०**

१ अष्टाङ्गयोगस्य स्वरूपम् उपस्थापयत।

२ भारतीयदर्शनेषु योगदर्शनस्य परिचयं विधाय तस्य वैशिष्ट्यं वर्णयत।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ किं नाम अनुशासनम्?

२ योगशास्त्रं केन प्रणीतम्?

३ योगः इति शब्दे कः धातुः?

४ योगदर्शने प्रमाणानि कति सन्ति?

५ वृत्तयः कति सन्ति?

६ को नाम विकल्पः?

७ को नाम अभ्यासः?

८ भवप्रत्ययः केषां भवति?

९ निरतिशयं सर्वज्ञबीजं कुत्र भवति?

१० कस्य वाचकः प्रणवः?

११ समापत्तयः कति सन्ति?

१२ समाधिः कतिविधः?

१३ को नाम रागः?

१४ को नाम द्वेषः?

१५ यमाः के सन्ति?